॥ वाल्मीकि रामायण॥

७ उत्तरकाण्ड

अध्याय ५५

एवमुक्तस्तु रामेण परां व्रीडामुपागतः ।
शत्रुघ्नो वीर्यसम्पन्नो मन्दं मन्दमुवाच ह ॥१॥

अवश्यं करणीयं च शासनं पुरुषर्षभ ।
तव चैव महाभाग शासनं दुरतिक्रमम् ।
अयं कामकरो राजंस्तवास्मि पुरुषर्षभ ॥२॥

एवमुक्ते तु शूरेण शत्रुघ्नेन महात्मना ।
उवाच रामः संहृष्टो लक्ष्मणं भरतं तथा ॥३॥

सम्भारानभिषेकस्य आनयध्वं समाहिताः ।
अद्यैव पुरुषव्याघ्रमभिषेक्ष्यामि दुर्जयम् ॥४॥

पुरोधसं च काकुत्स्थौ नैगमानृत्विजस्तथा ।
मन्त्रिणश्चैव मे सर्वानानयध्वं ममाज्ञया ॥५॥

राज्ञः शासनमाज्ञाय तथाकुर्वन्महारथः ।
अभिषेकसमारम्भं पुरस्कृत्य पुरोधसं ।
प्रविष्टा राजभवनं पुरन्दर गृहोपमम् ॥६॥

ततोऽभिषेको ववृधे शत्रुघ्नस्य महात्मनः ।
सम्प्रहर्षकरः श्रीमान्राघवस्य पुरस्य च ॥७॥

ततोऽभिषिक्तं शत्रुघ्नमङ्कमारोप्य राघवः ।
उवाच मधुरां वाणीं तेजस्तस्याभिपूरयन् ॥८॥

अयं शरस्त्वमोघस्ते दिव्यः परपुरञ्जयः ।
अनेन लवणं सौम्य हन्तासि रघुनन्दन ॥९॥

सृष्टः शरोऽयं काकुत्स्थ यदा शेते महार्णवे ।
स्वयम्भूरजितो देवो यं नापश्यन्सुरासुराः ॥१०॥

अदृश्यः सर्वभूतानां तेनायं हि शरोत्तमः ।
सृष्टः क्रोधाभिभूतेन विनाशार्थं दुरात्मनोः ।
मधुकैटभयोर्वीर विघाते वर्तमानयोः ॥११॥

स्रष्टुकामेन लोकांस्त्रींस्तौ चानेन हतौ युधि ।
अनेन शरमुख्येन ततो लोकांश्चकार सः ॥१२॥

नायं मया शरः पूर्वं रावणस्य वधार्थिना ।
मुखः शत्रुघ्न भूतानां महांस्त्रासो भवेदिति ॥१३॥

यच्च तस्य महच्छूलं त्र्यम्बकेण महात्मना ।
दत्तं शत्रुविनाशाय मधोरायुधमुत्तमम् ॥१४॥

तत्संनिक्षिप्य भवने पूज्यमानं पुनः पुनः ।
दिशः सर्वाः समालोक्य प्राप्नोत्याहारमात्मनः ॥१५॥

यदा तु युद्धमाकाङ्क्षन्कश्चिदेनं समाह्वयेत् ।
तदा शूलं गृहीत्वा तङ्गस्म रक्षः करोति तम् ॥१६॥

स त्वं पुरुषशार्दूल तमायुधविवर्जितम् ।
अप्रविष्टपुरं पूर्वं द्वारि तिष्ठ धृतायुधः ॥१७॥

अप्रविष्टं च भवनं युद्धाय पुरुषर्षभ ।
आह्वयेथा महाबाहो ततो हन्तासि राक्षसं ॥१८॥

अन्यथा क्रियमाणे तु अवध्यः स भविष्यति ।
यदि त्वेवं कृते वीर विनाशमुपयास्यति ॥१९॥

एतत्ते सर्वमाख्यातं शूलस्य च विपर्ययम् ।
श्रीमतः शितिकण्ठस्य कृत्यं हि दुरतिक्रमम् ॥२०॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 26, 1998; Send corrections to sanskrit@cheerful.com